# ॥ Tulsi Vivah Mangalashtak संपूर्ण Sanskrit / Hindi Lyrics ॥

॥ अथ मंगलाष्टक मंत्र ॥

ॐ श्रीमत्पंकजविष्टरौ हरिहरौ, वायुर्महेन्द्रोऽनलः।
चन्द्रो भास्कर वित्तपाल वरुण, प्रताधिपादिग्रहाः ।
प्रद्युम्नो नलकूबरौ सुरगजः, चिन्तामणिः कौस्तुभः,
स्वामी शक्तिधरश्च लांगलधरः, कुर्वन्तु वो मंगलम् ॥१॥

गंगा गोमति गोपति गणपतिः, गोविन्द गोवर्धनौ,
गीता गोमय गोरजौ गिरिसुता, गंगाधरो गौतमः ।
गायत्री गरुडो गदाधर गया, गम्भीर गोदावरी,
गन्धर्व ग्रह गोप गोकुलधराः, कुर्वन्तु वो मंगलम् ॥२॥

नेत्राणां त्रितयं महत्पशुपतेः, अग्नेश्च पादत्रयं,
तत्तद्विष्णुपदत्रयं त्रिभुवने, ख्यातं च रामत्रयम् ।
गङ्गावाहपथत्रयं सुविमलं, वेदत्रयं ब्राह्मणं,
संध्यानां त्रितयं द्विजैरभिमतं, कुर्वन्तु वो मंगलम् ॥३॥

बाल्मीकिः सनकः सनन्दनमुनिः, व्यासो वसिष्ठो भृगुः,
जाबालि जमदग्निरत्रिजनकौ, गर्गोऽङ्गिरा गौतमः ।
मान्धाता भरतो नृपश्च सगरो, धन्यो दिलीपो नलः,
पुण्यो धर्मसुतो ययातिनहुषौ, कुर्वन्तु वो मंगलम् ॥४॥

गौरी श्रीकुलदेवता च सुभगा, कद्रूसुपर्णाश्च शिवाः,
सावित्री च सरस्वती च सुरभिः, सत्यव्रतारुन्धती ।

स्वाहा जाम्बवती च रुक्मिणी, दुःस्वप्नविध्वंसिनी,

वेला चाम्बुनिधेः समीनमकरा, कुर्वन्तु वो मंगलम् ॥५॥

गङ्गा सिन्धु सरस्वती च यमुना, गोदावरी नर्मदा,

कावेरी शरयू महेन्द्रतनया, शर्मण्वती वेदिका ।

क्षिप्रा वेत्रवती महासुरनदी, ख्याता गया गण्डकी,

पूर्णाः पुण्यजलैः समुद्रसहिताः, कुर्वन्तु वो मंगलम् ॥६॥

लक्ष्मीः कौस्तुभ पारिजातक सुरा, धन्वन्तरिश्चन्द्रमाः ।

गावः कामदुघाः सुरेश्वरगजो, रम्भादिदेवांगनाः ।

अश्वः सप्तमुखः सुधा हरिधनुः, शंखो विषं चाम्बुधेः,

रत्नानीति चतुर्दश प्रतिदिनं, कुर्वन्तु वो मंगलम् ॥७॥

ब्रह्मा वेदपतिः शिवः पशुपतिः, सूर्यो ग्रहाणां पतिः,

शुक्रो देवपतिः नृलो नरपतिः, स्कन्दश्च सेनापतिः ।

विष्णुर्यज्ञपतिर्यमः पितृपतिः, तारापतिश्चन्द्रमाः,

इत्येते पतयः सुपर्णसहिताः, कुर्वन्तु वो मंगलम् ॥८॥

॥ इति मंगलाष्टक समाप्त ॥

## ॥ Tulsi Vivah Mangalashtak Marathi **संपूर्ण मराठी लिरिक्स** ॥

॥ श्री तुलसी विवाह मंगलाष्टक ॥

॥ अथ मंगलाष्टक मंत्र ॥

स्वस्ति श्री गणनायकं गजमुखं, मोरेश्वरं सिद्धिदं ।

बल्लाळो मुरुडं विनायकमहं, चिन्तामणि स्थेवरं ॥
लेण्याद्रिं गिरिजात्मकं सुरवरदं, विघ्नेश्वरम् ओझरम् ।
ग्रामे रांजण संस्थितम् गणपतिः, कुर्यात् सदा मंगलम् ॥१॥

गंगा सिंधु सरस्वती च यमुना, गोदावरी नर्मदा ।
कावेरी शरयू महेंद्रतनया, शर्मण्वती वेदिका ।
क्षिप्रा वेत्रवती महासुरनदी, ख्याता गया गण्डकी ।
पूर्णा पूर्णजलैः समुद्रसरिता, कुर्यात् सदा मंगलम् ॥२॥

लक्ष्मीः कौस्तुभ पारिजातक सुरा, धन्वन्तरिश्चन्द्रमाः ।
गावः कामदुघाः सुरेश्वरगजो, रम्भादिदेवांगनाः ।
अश्वः सप्तमुखः सुधा हरिधनुः, शंखो विषं चाम्बुधेः ।
रत्नानीति चतुर्दश प्रतिदिनं, कुर्यात् सदा मंगलम् ॥३॥

राजा भीष्मक रुक्मिणीस नयनी, देखोनी चिंता करी ।
ही कन्या सगुणा वरा न पवरा, कवणासि देईजे ॥
आता एक विचार कृष्ण नवरा, त्यासी समर्पू म्हणे ।
रुख्मी पुत्र वडील त्यासि पुसणे, कुर्यात् सदा मंगलम् ॥४॥

लक्ष्मी कौस्तुभ पांचजन्य धनु हे, अंगीकारी श्रीहरी ।
रंभा कुंजर पारिजातक सुधा, देवेंद्र हे आवरी ॥
दैत्या प्राप्ती सुरा विधू विष हरा, उच्चैश्रवा भास्करा ।
धनु वैद्य वधू वराशी चवदा, कुर्यात् सदा मंगलम् ॥५॥

गौरी श्रीकुलदेवता च सुभगा, कद्रूसुपर्णाश्च शिवाः ।
सावित्री च सरस्वती च सुरभिः, सत्यव्रतारुन्धती ।

स्वाहा जाम्बवती च रुक्मिणी, दुःस्वप्नविध्वंसिनी ।

वेला चाम्बुनिधेः समीनमकरा, कुर्यात् सदा मंगलम् ॥६॥

आली लग्नघडी समीप नवरा घेऊनि यावा घरा ।

गृह्योत्के मधुपर्कपूजन करा, अन्तःपटाते धारा ॥

दृष्टादृष्ट वधुवरा न करितां, दोघे करावी उभी ।

वाजंत्रे बहु गलबला न करणे, लक्ष्मीपते मंगलम् ॥७॥

ब्रह्मा वेदपतिः शिवः पशुपतिः, सूर्यो ग्रहाणां पतिः ।

शुक्रो देवपतिः नृलो नरपतिः, स्कन्दश्च सेनापतिः ।

विष्णुर्यज्ञपतिर्यमः पितृपतिः, तारापतिश्चन्द्रमाः ।

इत्येते पतयः सुपर्णसहिताः, कुर्यात् सदा मंगलम् ॥८॥

॥ इति तुळशी विवाह मंगलाष्टक समाप्त ॥

## ll Tulsi Vivah Mangalashtak English Transliteration ll

ll Atha Mangalashtak Mantra ll

Om Shrimat-pankaja-vishtarau Hari-harau, Vaayu-r-mahendro-analah,

Chandro Bhaskara Vittapaal Varuna, Pratadhipaadigrahah,

Pradyumno Nalakoobarau Suragajah, Chintamanir Kaustubhah,

Swami Shakti-dharashcha Langal-dharah, Kurvantu Vo Mangalam. ll1 ll

Ganga Gomati Gopati Ganapati-h, Govinda Govardhanau,

Gita Gomaya Gorajau Girisuta, Gangaadharo Gautamah,

Gayatri Garudo Gadaadhara Gaya, Gambhira Godavari,

Gandharva Graha Gopa Gokuladharah, Kurvantu Vo Mangalam. ll2 ll

Netraanaam Tritayam Mahat-Pashupateh, Agneshcha Paadatrayam,

Tattad-Vishnu-pada-trayam Tribhuvane, Khyatam Cha Raama-trayam,

Ganga-vaaha-patha-trayam Suvimalam, Veda-trayam Braahmananam,

Sandhyaanaam Tritayam Dvijair-abhimatam, Kurvantu Vo Mangalam. ll3 ll

Vaalmiki-h Sanak-h Sanandana-muni-h, Vyaso Vasishto Bhrighu-h,

Jabaali Jamadagni-r-atri-Janakau, Gargo-Angira Gautamah,

Maandhata Bharato Nripashcha Sagaro, Dhanyo Dilepo Nalah,

Punyo Dharmasuto Yayaati-Nahushau, Kurvantu Vo Mangalam. ll4 ll

Gauri Shri-kula-devata Cha Subhaga, Kadru-Suparnashcha Shivah,

Savitri Cha Saraswati Cha Surabhih, Satyavrata-Arundhati,

Swaha Jambavati Cha Rukmini, Duh-svapna-vidhvamsini,

Vela Chaambu-nidheh Sameena-Makaraa, Kurvantu Vo Mangalam. ll5 ll

Ganga Sindhu Saraswati Cha Yamuna, Godavari Narmada,

Kaveri Sharayu Mahendra-tanaya, Sharmanvati Vedika,

Kshipra Vetravati Mahasura-nadi, Khyata Gaya Gandaki,

Purnah Punya-jalaih Samudra-sahitah, Kurvantu Vo Mangalam. ll6 ll

Lakshmih Kaustubha Parijataka Sura, Dhanvantari-Chandramah,

Gaavah Kaamadughah Sureshvara-Gajo, Rambhadi-Devaanganah,

Ashvah Sapta-mukhah Sudha Haridhanu-h, Shanko Visham Chaambhudheh,

Ratnaaniti Chaturdasha Pratidinam, Kurvantu Vo Mangalam. ll7 ll

Brahma Veda-patih Shivah Pashu-patih, Suryo Grahaanaam Patih,

Shukro Deva-patih Nripo Nara-patih, Skanda-shcha Sena-patih,

Vishnur-Yajna-patir-Yamah Pitru-patih, Taarapatish-Chandramah,

Ityete Patayah Suparna-sahitah, Kurvantu Vo Mangalam. ll8 ll

ll Iti Mangalashtak Samapt ll